छ) विजयसेने शासति धर्मः भुवि केनोपायेन संचचार?

ज) श्रीचन्द्रस्य रामपालताम्रशासनं कं देवम् हेतुं च उद्दिश्य दत्तम्? तत् कया मुद्रया अङ्कितम्?

२। अधोलिखितेषु **चत्वारः प्रश्नाः** समाधेयाः। $6\times4=24$

क) आइहोलप्रशस्तिम् अनुसृत्य कीर्तिवर्मा मङ्गलेशश्च वर्णनीयौ।

ख) निधनपुरताम्रशासनं केन हेतुना भास्करवर्मणा पुनः प्रचारितम्? तच्छासनसंबद्धान् प्राशासनिकपुरुषान् अधिकृत्य आलोचना कार्या। $2+4$

ग) खालिमपुरशासने पालान्वयः कथं वर्णितः? तेन शासनेन के ग्रामा धर्मपालेन कस्यानुरोधात् कस्मै दीयन्ते? किं प्रयोजनम् उद्दिश्य ग्रामाः प्रार्थिताः? $2+3+1$

घ) देवपालदेवस्य नालन्दाताम्रशासनानुसारं शैलेन्द्रवंशीयनृपा वर्णनीयाः।

ङ) देवपाडाप्रशस्त्यां सामन्तसेनहेमन्तसेनौ कथं प्रस्तूयेते? हेमन्तसेनस्य प्रधाना राज्ञी का? सा कीदृशी? $4+\frac{1}{2}+1\frac{1}{2}$

च) "आधारो हरिकेलराजककुदच्छत्रस्मितानां श्रियां
यश्चन्द्रोपपदे बभूव नृपतिर्द्वीपे दिलीपोपमः॥"

— कुत्र वर्तते अयं श्लोकांशः? अस्य ऐतिहासिकतात्पर्यं विव्रियताम्। तस्मिन् शासने दानग्रहीतुः परिचयो यथा दीयते तथा उच्यताम्। $\frac{1}{2}+3+2\frac{1}{2}$



# Master of Arts Examination, 2022

(2nd Year, 4th Semester)

## SANSKRIT

## Course – XVII/E

## [Select Inscriptions of Contemporary Gupta and Post Gupta Rulers]

Time : Two hours Full Marks : 30

*The figures in the margin indicate full marks.*

१। अधोलिखितेषु **षट् प्रश्नाः** सुरगिरा देवनागर्या लिप्या समाधेयाः। $1\times6=6$

क) कीर्तिवर्मा कस्य पुत्र आसीत्? आइहोलप्रशस्त्यनुसारं स केषां कालरात्रिरासीत्?

ख) वनवासीनगरी कया नद्या संबद्धासीत्? द्वितीयपुलकेशिनो दिग्विजयाभियानकाले मौर्याः कुत्र स्थिता आसन्?

ग) क आसीत् नरकासुरस्य पुत्रः? निधनपुरशासनानुसारं स नरकपुत्रः किं चकार?

घ) भास्करवर्मणः पित्रोः भ्रातुश्च नामानि उच्यन्ताम्।

ङ) धर्मपालदेवस्य खालिमपुरशासने प्रथमगोपालः केन प्रकारेण राजा बभूव?

च) चक्रायुधस्य अभिषेककाले येषां देशानां नृपाः कान्यकुब्जसभायाम् उपस्थिताः तेषु द्वयस्य नामनी उल्लिख्येताम्। तदा कैः कनकमयाभिषेकोदकुम्भाः उद्धृताः?